दक्षिणाचारः, पुं, (दक्षिणोऽप्रतिकूल आचारः।) आचारविशेषः। यथा,—
"स्वधर्म्मनिरतो भूत्वा पञ्चतत्त्वेन पूजयेत्।
स एव दक्षिणाचारः शिवो भूत्वा शिवां यजेत्॥"
इत्याचारभेदतन्त्रम्॥
(एतदाचारोक्तकर्म्मादिकं वामाचारवत् कठोरतरं न। तथाच काश्मीराजप्रणीतदक्षिणाचारतन्त्रे।
"दक्षिणाचारतन्त्रोक्तं कर्म्म तच्छुद्धवैदिकम्॥"
दक्षिणोऽनुकूलः साधुराचारो व्यवहारो यस्य। शिष्टाचारविशिष्टे, त्रि। यथा, महाभारते। ४।५।२७।
"दक्षिणां दक्षिणाचारो दिशं येनाजयत् प्रभुः॥")

दक्षिणात्, व्य, (वसत्यागतो रमणीयं वा। दक्षिणस्यां दिशि दक्षिणस्या दिशः दक्षिणा वा दिक् इति। "उत्तराधरदक्षिणादातिः।" ५।३।३४। इति आतिः।) दक्षिणस्यां दिशि। इत्यमरटीकायां रायमुकुटः॥

दक्षिणापथजन्मा, [न्] पुं, (दक्षिणा दक्षिणस्यां दिशि यः पन्थाः तत्र जन्म यस्य।) जातिविशेषः। यथा, महाभारते।१२।२०७।४२-४५।
"दक्षिणापथजन्मानः सर्व्वे नरवरान्ध्रकाः।
गुहाः पुलिन्दाः शवराः चुचुका मद्रकैः सह॥
उत्तरापथजन्मानः कीर्त्तयिष्यामि तानपि।
यौनकाम्बोजगान्धाराः किराता वर्व्वरैः सह॥
एते पापकृतस्तात! चरन्ति पृथिवीमिमाम्।
श्वपाकवलगृध्राणां सधर्म्माणो नराधिप!॥
नैते कृतयुगे तात! चरन्ति पृथिवीमिमाम्।
त्रेताप्रभृति वर्त्तन्ते ते जना भरतर्षभ!॥"

दक्षिणामुखः, त्रि, (दक्षिणा दक्षिणस्यां दिशि मुखं यस्य।) दक्षिणदिङ्मुखः। यथा,—
"अमास्नानं गयाश्राद्धं दक्षिणामुखभोजनम्।
न जीवत्पितृकः कुर्य्यात् कृते च पितृहा भवेत्॥"
इति तिथ्यादितत्त्वम्॥

दक्षिणायनं, क्ली, (दक्षिणा दक्षिणस्यां दिशि दक्षिणे गोले वा अयनम्।) सूर्य्यस्य दक्षिणागतिः। सा श्रावणादिषट्सु मासेषु भवति। इत्यमरः॥ * ॥ यथा,—
"कर्क्कटावस्थिते भानौ दक्षिणायनमुच्यते।
उत्तरायणमप्युक्तं मकरस्थे दिवाकरे॥ इति।
अयनस्योत्तरस्यादौ मकरं याति भास्करः।
राशिं कर्क्कटकं प्राप्य कुरुते दक्षिणायनम्॥"
इति विष्णुपुराणोक्तासूर्य्यादावयनपरिग्रहः
सौरेण।
दिनमानादिबोधे तु सिद्धान्तादयनपरिग्रहः।
इति॥
मृगसंक्रान्तितः पूर्व्वं पश्चात्ताराद्दिनान्तरे।
एकवर्षं चतुःपञ्चपलमानक्रमेण तु॥
षट्षष्टिवत्सरानेकदिनं स्यादयनं रवेः।
एवं चतुःपञ्चदिनमयनारम्भणं क्रमात्॥
एतत्क्रमेण च तद्वत् स्यादुदगयानं रवेर्ध्रुवम्॥
कर्किसंक्रमणे तद्वदभितो दक्षिणायनम्।
अयनांशक्रमेणैव विषुवारम्भणं तथा॥"
इति च ज्योतिस्तत्त्वम्॥
तत्र जातस्य फलं यथा,—
"याम्यायने यस्य भवेत् प्रसूतिः
शठः कठोरः पिशुनस्वभावः।
चतुष्पदाढ्यः कृषिमानकृत्यु-
र्व्वाचामशान्तो मनुजः प्रतापी॥"
इति कोष्ठीप्रदीपः॥ * ॥
कर्कटसंक्रान्तिः। यथा,—
"मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने।
विषुवती तुलामेषे गोलमध्ये तथापराः॥"
इति तिथ्यादितत्त्वम्॥ * ॥
अयनचक्रं यथा,—
"चक्रं सारं विलिख्य ग्रहपतिरयने संक्रमञ्चेत्
करोति
यस्मिन्नृक्षे तदृक्षं मरणभयकरं शूलमूले
निदध्यात्।
तत्पश्चादारशूले विविधभयकरं शूलपार्श्वे-
ऽर्थलाभः
सौख्यं स्याच्चक्रगर्भे विविधमुनिमतं विद्धि
वामक्रमेण॥"
इति ज्योतिषम्॥
("त एते शीतोष्णवर्षलक्षणाश्चन्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरञ्च। तयोर्दक्षिणं वर्षाशरद्धेमन्तास्तेषु भगवानाप्यायते सोमोऽम्ललवणमधुराश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्व्वप्राणिनां बलमभिवर्द्धते॥"
इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये॥)

दक्षिणारुः, [स्] पुं, (दक्षिणे दक्षिणभागे अरुर्व्रणमस्य।) व्याधकर्त्तृकदक्षिणाङ्गव्रणितमृगः। इत्यमरः। २।१०।२४॥

दक्षिणार्हः, त्रि, (दक्षिणामर्हतीति। अर्ह + "अर्हः।" ३।२।१२। इत्यच्।) दक्षिणायोग्यः। ऋत्वाश्रये दक्षिणामर्हति यः। इति भरतः॥ तत्पर्य्यायः। दक्षिणीयः २ दक्षिण्यः ३। इत्यमरः। ३।१।५॥

दक्षिणावर्त्तकी, स्त्री, (दक्षिणे आवर्त्तते इति। आ + वृत् + ण्वुल्। गौरादित्वात् ङीष्।) वृश्चिकालिः। इति राजनिर्घण्टः॥

दक्षिणाशापतिः, पुं, (दक्षिणाशाया दक्षिणस्या दिशः अधिपतिः।) यमः। इति हेमचन्द्रः। २।९८॥

दक्षिणीयः, त्रि, (दक्षिणामर्हतीति। दक्षिणा + "कडङ्करदक्षिणाच्छ च।" ५।१।६९। इति छः।) दक्षिणार्हः। इत्यमरः। ३।१।५। (यथा, हरिवंशे। ४८।७९।
"क्रतवः संप्रवर्त्तन्तां दक्षिणीयैर्द्विजातिभिः।
दक्षिणाश्चोपवर्त्तन्तां यथोक्ताः सर्व्वसत्त्रिणः॥"
तथाच अथर्व्ववेदे। ८।१०।४।
"यन्त्यस्य दक्षिणीयो वासतेयो भवति य
एवं वेद॥")

दक्षिणेन, व्य, (दक्षिण + "एनबन्यतरस्यामदूरेऽपञ्चम्याः।" ५।३।३५। इति एनप्।) दक्षिणदिशि। इति रायमुकुटः॥ दक्षिणभागे। (अस्य योगेन द्वितीया भवति।) यथा,—
"दक्षिणेन हरिं रुद्रो गोविन्दमतिनेश्वरः।
येनेशं हरिरीशस्य तेनेशमभिबोऽच्चैकाः॥"
इति मुग्धबोधम्॥
(क्वचित् द्वितीयाप्रयोगाभावोऽपि दृश्यते। यथा, महाभारते। ३।८३।४।
"दक्षिणेन सरस्वत्या दृषद्वत्युत्तरेण च।
ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिपिष्टपे॥")

दक्षिणेर्म्मा, [न्] पुं, (दक्षिणे ईर्म्मं व्रणं यस्य। "दक्षिणेर्म्मा लुब्धयोगे।" ५।४।१२६। इति अनिच्।) व्याधशराघातात् दक्षिणाङ्गव्रणयुक्तमृगः। तत्पर्य्यायः। दक्षिणारुः २। इत्यमरः। १०।२४॥ (यथा, भट्टिः। ४।४४।
"मृगायुमिव मृगोऽथ दक्षिणेर्म्मा
दिशामिव दाहवतीं मरावुदन्यन्॥")

दक्षिण्यः, त्रि, (दक्षिणामर्हतीति। "कडङ्करदक्षिणाच्छ च।" ५।१।६९। इति चकारात् यत्।) दक्षिणार्हः। इत्यमरः। ३।१।५॥ (यथा, भट्टिः। २।२९।
"दक्षिण्यदिष्टां कृतमार्त्तिजीनै-
स्तद्यातुधानैश्चिचिते प्रसर्पत्॥")

दग्धं, क्ली, कत्तृणम्। इति रत्नमाला॥

दग्धः, त्रि, (दह्यते स्म इति। दह + क्तः।) भस्मीकृतः। पोड़ा इति भाषा। तत्पर्य्यायः। प्लुष्टः २ प्लुष्टः ३ उषितः ४। इत्यमरः। ३।१।९९॥ (यथा, मनुः। ८।१८९।
"चौरैर्हृतं जलेनोढ़मग्निना दग्धमेव वा।
न दद्यात् यदि तस्मात् स न संहरति किञ्चन॥")
"पत्राणामामिषं पर्णम्।
गोर्व्वर्ज्यमामिषं चौरं फले जम्बीरमामिषम्।
आमिषं रक्तशाकञ्च सर्व्वञ्च दग्धमामिषम्॥"
इति कर्म्मलोचनम्॥
(म्लानम्। यथा, अमरुशतके। २४।
"रुद्धायामपि वाचि सस्मितमिदं दग्धाननं
जायते॥"
चन्द्राश्रितराशिमूलकपारिभाषिकग्रहम्। यथा, ज्योतिषतत्त्वे।
"मृगसिंहौ तृतीयायां प्रथमायां तुलामृगौ।
पञ्चम्यां बुधराशी द्वौ सप्तम्यां चापयन्त्रभे॥
नवम्यां सिंहकीटाख्यावेकादश्यां गुरोर्गृहे।
वृषमीनौ त्रयोदश्यां दग्धसंज्ञास्त्वमी ग्रहाः।
दग्धसद्मनि यत् कर्म्म कृतं सर्व्वं विनश्यति॥")

दग्धकाकः, पुं, (दग्ध इव कृष्णवर्णः काकः।) द्रोणकाकः। इति हेमचन्द्रः। ४।३८९॥

दग्धरथः, पुं, (दग्धो रथोऽस्य।) चित्ररथगन्धर्व्वः। इति महाभारतम्॥ (यथा, महाभारते। १।१७१।३९।
"अस्त्राग्निना विचित्रोऽयं दग्धो मे रथ उत्तमः।
सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवम्॥")